**दीर्घपल्लव** पु० दीर्घः पल्लवोऽस्य । १शणवृक्षे राजनि० २आयत पत्रयुक्ते त्रि० । कर्म० । ३आयते पल्लवे पुंन० ।

**दीर्घपाद्** पु० दीर्घः पादोऽस्य अन्यलोपः समा०। कङ्कपक्षि शब्दर० समासान्तविधेरनित्यत्वात् दीर्घपादोऽप्यत्र हेमच० २दीर्घपादयुक्ते त्रि०। [कर्म०। ३दीर्घे हस्ते पु०।

**दीर्घपादप** पु० नित्यकर्म० । १तालवृक्षे २पूगे च राजनि० ।

**दीर्घपृष्ठ** पुंस्त्री० दीर्घं पृष्ठमस्य । सर्पे अमरः स्त्रियां ङीष् ।

**दीर्घप्रज्ञ** पु० १द्वापरयुगीये वृषपर्वासुरावतारे नृपभेदे "वृषपर्वेति विख्यातः श्रीमान् यस्तु महासुरः । दीर्घप्रज्ञ इति ख्यातः पृथिव्यां सोऽभवन्नृपः !"। भा०आ०६७अ० "अमितौजसे तथोग्राय हार्दिक्यायाहुकाय च । दीर्घप्रज्ञाय शूराय रोचमानाय वा विभो !" भा०उ०३अ० । २दूरदर्शिनि त्रि० "काममूर्तिधरः क्रूरः कालकल्पोऽव्यहस्तदा । तमुवाच ततो राजा दीर्घप्रज्ञो युधिष्ठिरः" भा० व०११ अ० ।

**दीर्घफल** पु० दीर्घाणि फलान्यस्य । १आरग्वधे (सोन्दाल) संज्ञायां कन् । दीर्घफलक । अगस्त्यवृक्षे पु० । वा कप् कापि अत इत्त्वम् । दीर्घफलिका १कपिलद्राक्षायां, २जतुकायाञ्च स्त्री राजनि० [चमर्यां राजनि०।

**दीर्घबाली** स्त्री दीर्घः बालः केशो यस्याः स्वाङ्गत्वात् ङीष् ।

**दीर्घबाहु** पु०। दीर्घौ बाहू यस्य । १शिवानुचरभेदे "तस्यापे समपद्यन्त भूतसंघाः सहस्रशः" इत्युपक्रमे "दीर्घरोमा दीर्घभुजो दीर्घबाहुर्निरञ्जनः" हरिवं० २७७ अ० । २धृतराष्ट्रपुत्रभेदे "दीर्घबाहुर्महाबाहुर्व्यूढोरुः कनकाङ्गदः" भा०आ० ६७अ०। ३आयतबाहुयुक्ते त्रि० "दीर्घबाहुर्दिलीपस्य रघुर्नाम्नाऽभवत् सुतः" हरिवं०१५अ०

**दीर्घभुज** पु० दीर्घौ भुजौ यस्य । १शिवानुचरभेदे दीर्घबाहुशब्दे दृश्यम् । २दीर्घबाहुयुक्ते त्रि०कर्म०। ३दीर्घे भुजे पु०।

**दीर्घमारुत** पुंस्त्री दीर्घो मारुतो वेगवायुरस्य । गजे त्रिका० स्त्रियां जातित्वात् ङीष् ।

**दीर्घमूल** पु० दीर्घं मूलं यस्य । १मोरटालतायां, २बिल्वभेदे च राजनि०। ३लामज्जके न०। कर्म०संज्ञायां कन् । ४मूलके राजनि० । ५श्यामालतायां शालपर्ण्याञ्च स्त्री टाप् रत्नमाला । ६दुरालभायां स्त्री ङीप् शब्दमाला ।

**दीर्घयज्ञ** त्रि०दीर्घः बहुकालव्यापको यज्ञो यस्य । १बहुकालव्यापकयज्ञकारिणि । २द्वापरयुगीये अयोध्याधिप राजभेदे पु० "अयोध्यायान्तु धर्मज्ञं दीर्घयज्ञं महाबलम् । अजयत् पाण्डवश्रेष्ठो नातितीव्रेण कर्मणा" भा०२८अ०।

**दीर्घयाथ** त्रि० या—कर्मणि थ । दीर्घकालेन याथः गन्तव्यः । दीर्घकालेन गन्तव्ये "इयास्त्विद् यथिभिर्दीर्घयाथैः" ऋ०२.१८.३. "दीर्घयाथैर्दीर्घकालेन गन्तव्यैः" भा०।

**दीर्घरद** पुंस्त्री० दीर्घौ रदोऽस्य । १शूकरे त्रिका० स्त्रियां ङीष् । २दीर्घदन्तयुते त्रि० कर्म०। ३दीर्घे दन्ते पु०।

**दीर्घरसन** पुंस्त्री० दीर्घा रसना जिह्वास्य । सर्पे शब्दच० स्त्रियां ङीष् । [पु०न०। हरिद्रायाम् राजनि० ।

**दीर्घरागा** स्त्री दीर्घो बहुकालस्थायी रागो रञ्जनं यस्याः

**दीर्घरात** न० दीर्घा बह्व्यो रात्रयः सन्त्यत्र अर्श० अच् । १चिरकाले त्रिका०कर्म०। मुग्धबोधमते अ समा० । २दीर्घायां रात्रौ "रात्राह्नाहाः पुंसि" पा०उक्तेः पुंस्त्वम् ।

**दीर्घरोमन्** पु०दीर्घाणि रोमाण्यस्य । १भल्लूके शब्दार्थकल्प०। २शिवानुचरभेदे दीर्घबाहुशब्दे दृश्यम् । ३धृतराष्ट्रपुत्रभेदे च "प्रमथश्च प्रमाथी च दीर्घरोमा च वीर्यवान्" भा०आ० ११७अ० अत्र सर्वे नान्ता अदन्ताः सुरित्युक्तेः रदन्ततापस्य

**दीर्घरोहिषक** न०नित्यकर्म०। कतृणे सुगन्धतृणभेदे राजनि०

**दीर्घलोचन** त्रि० दीर्घमायतं लोचनमस्य । १आयतनेत्रके २शिवानुचरभेदे पु० "एते चान्ये च बहवो दीर्घास्या दीर्घलोचनाः" हरिवं०२७अ०३धृतराष्ट्रपुत्रभेदे पु० "अनाधृष्यः कुण्डभेदी विरावी दीर्घलोचनः" भा०आ० ६७अ० । धृतराष्ट्रपुत्रोक्तौ । कर्म० । ४आयते नेत्रे न०

**दीर्घवंश** पु० दीर्घो वंश इव । नलतृणे राजनि० कर्म० । २सन्तते कुले च ।

**दीर्घवक्त्र** पुंस्त्री० दीर्घं वक्त्रमस्य । १गजे शब्दमा० स्त्रियां जातित्वात् ङीष् । २आयतमुखयुक्ते त्रि० स्त्रियां स्वाङ्गत्वेऽपि टाप् कर्म०। ३आयते मुखे न०

**दीर्घवच्छिका** स्त्री दीर्घवत् दीर्घेण तुल्यं शीकते सिञ्चति शीक—क पृषो० ह्रस्वः । कुम्भीरे शब्दार्थकल्प० ।

**दीर्घवर्षाभू** पुंस्त्री०नित्यकर्म०। श्वेतपुनर्नवायाम् पारस्करनि०

**दीर्घवल्ली** स्त्री नित्यकर्म० । १पलाश्यां, २पातालगरुडीलतायां ३माहेन्द्रवारुण्याम् राजनि० कर्म० । ४आयतायां लतायाञ्च [स्करनिघण्टुः ।

**दीर्घवृन्त** पु० नित्यकर्म०। १श्योनाकवृक्षे २तालवृक्षे च पार-

**दीर्घवृन्त(क)** पु० दीर्घं वृन्तमस्य । श्योनाके वृक्षे । वा कप् । तत्रार्थे । २इन्द्रचिर्भटयां स्त्री टाप् अमरः। संज्ञायां कन् अत इत्त्वम् दीर्घवृन्तिका। एलापर्ण्याम् स्त्री रत्नमाला ।

**दीर्घशर** पु० नित्यकर्म० । यावनाले राजनि० ।